# Siddhivinayaka Shodashopachara Pujastutih 1

# સિદ્ધિવિનાયકષોડશોપચારપૂજાસ્તુતિઃ ૧

## Document Information

Text title : Siddhivinayaka Shodashopachara Pujastutih 1

File name : siddhivinAyakaShoDashopachArapUjAstutiH1.itx

Category : ganesha, pUjA, ShoDasha, stuti

Location : doc_ganesha

Proofread by : Narendran Madathil

Description/comments : From Vighneshvara-stuti-manjari 4

Latest update : October 10, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 10, 2026

*sanskritdocuments.org*

# સિદ્ધિવિનાયકષોડશોપચારપૂજાસ્તુતિઃ ૧

વક્રતુણ્ડ મહાકાય સૂર્યકોટિસમપ્રભ ।
નિર્વિઘ્નં કુરુ મે દેવ સર્વકાર્યેષુ સર્વદા ॥ ૧॥

એકદન્તં શૂર્પકર્ણં ગજવક્ત્રં ચતુર્ભુજમ્ ।
પાશાઙ્કુશધરં દેવં વન્દે સિદ્ધિવિનાયકમ્ ॥ ૨॥

વન્દે ગજાનનં દેવં તપ્તકાઞ્ચનસન્નિભમ્ ।
ચતુર્ભુજં મહાકાયં સર્વાભરણભૂષિતમ્ ॥ ૩॥

અત્રાગચ્છ જગદ્વન્દ્ય સુરરાજાર્ચિતેશ્વર ।
અનાથનાથ સર્વજ્ઞ ગીર્વાણાસુરપૂજિત ॥ ૪॥

અનેકરત્નખચિતં મુક્તામણિવિભૂષિતમ્ ।
રત્નસિંહાસનં ચારુ ગણેશ પ્રતિગૃહ્યતામ્ ॥ ૫॥

ગૌરીપુત્ર નમસ્તેઽસ્તુ દૂર્વાપદ્માદિસંયુતમ્ ।
ભક્ત્યા પાદ્યં મયા દત્તં ગૃહાણ દ્વિરદાનન ॥ ૬॥

સિદ્ધાર્થ યવદૂર્વાભિઃ ગન્ધપુષ્પાક્ષતૈર્યુતમ્ ।
તિલપુષ્પસમાયુક્તં ગૃહાણાર્ઘ્યં ગજાનન ॥ ૭॥

કર્પૂરાગરુપુષ્પૈશ્ચ વાસિતં વિમલં જલમ્ ।
ભક્ત્યા દત્તં મયા દેવ કુરુષ્વાચમનં પ્રભો ॥ ૮॥

દધ્યાજ્યમધુસંયુક્તં મધુપર્કં મયાઽઽહૃતમ્ ।
ગૃહાણ સર્વલોકેશ ગજવક્ત્ર નમોઽસ્તુ તે ॥ ૯॥

મધ્વાજ્યશર્કરાયુક્તં દધિક્ષીરસમન્વિતમ્ ।
પઞ્ચામૃતં ગૃહાણેદં ભક્તાનામિષ્ટદાયક ॥ ૧૦॥

ગઙ્ગાદિપુણ્યપાનીયૈઃ ગન્ધપુષ્પાક્ષતૈ ર્યુતૈઃ ।
સ્નાનં કુરુષ્વ ભગવન્ ઉમાપુત્ર નમોઽસ્તુ તે ॥ ૧૧॥

રક્તવસ્ત્રદ્વયં દેવ રાજરાજાદિપૂજિત ।
ભક્ત્યા દત્તં ગૃહાણેદં ભગવન્હરનન્દન ॥ ૧૨॥

રાજતં બ્રહ્મસૂત્રં ચ કાઞ્ચનં ચોત્તરીયકમ્ ।
ગૃહાણ ચારુ સર્વજ્ઞ ભક્તાનામિષ્ટદાયક ॥ ૧૩॥

ચન્દનાગરુકર્પૂરકસ્તૂરીકુઙ્કુમાન્વિતમ્ ।
વિલેપનં સુરશ્રેષ્ઠ પ્રીત્યર્થં પ્રતિગૃહ્યતામ્ ॥ ૧૪॥

અક્ષતાન્ધવલાન્દિવ્યાન્ શાલીયાનક્ષતાન્ શુભાન્ ।
હરિદ્રાચૂર્ણસંયુક્તાન્ સઙ્ગૃહાણ ગણાધિપ ॥ ૧૫॥

સુગન્ધીનિ સુપુષ્પાણિ જાજી કુન્દમુખાનિ ચ ।
એકવિંશતિ સઙ્ખ્યાનિ ગૃહાણ ગણનાયક ॥ ૧૬॥

ચન્દનાગુરુકસ્તૂરીચન્દ્રગુગ્ગુલુસંયુતમ્ ।
ધૂપં ગૃહાણ વરદ ધૂતપાપ નમોઽસ્તુ તે ॥ ૧૭॥

દીપં ગૃહાણ દેવેશ વર્તિત્રયસમન્વિતમ્ ।
ગણરાજ નમસ્તુભ્યં અજ્ઞાનં વિનિવર્તય ॥ ૧૮॥

શાલ્યન્નં પાયસાદીનિ મોદકાઞ્ચ ફલાનિ ચ ।
નિવેદિતં ગૃહાણેશ નિત્યતૃપ્ત નમોઽસ્તુ તે ॥ ૧૯॥

પૂગીફલસમાયુક્તં નાગવલ્લીદલૈર્યુતમ્ ।
કર્પૂરચૂર્ણસંયુક્તં તામ્બૂલં પ્રતિગૃહ્યતામ્ ॥ ૨૦॥

ચન્દ્રાદિત્યૌ ગ્રહાસ્તારાઃ વિદ્યુદગ્નિર્વિભાસ્વરમ્ ।
ત્વમેવ સર્વં તત્તેજો નીરાજનમિદં પ્રભો ॥ ૨૧॥

નમો નમો ગણેશાય નમસ્તે વિશ્વરૂપિણે ।
નિર્વિઘ્નં કુરુ મે કામં નમામિ ત્વાં ગજાનન ॥ ૨૨॥

અગજાનનપદ્માર્કં ગજાનનમહર્નિશમ્ ।
અનેકદં તં ભક્તાનાં એકદન્તમુપાસ્મહે ॥ ૨૩॥

વિનાયક વરં દેહિ મહાત્મન્મોદકપ્રિય ।
અવિઘ્નં કુરુ મે દેવ સર્વકાર્યેષુ સર્વદા ॥ ૨૪॥

યસ્ય સ્મૃત્યા ચ નામોક્ત્યા તપઃ પૂજા ક્રિયાદિષુ ।
ન્યૂનં સમ્પૂર્ણતાં યાતિ સદ્યો વન્દે ગજાનનમ્ ॥ ૨૫॥

ઇતિ સિદ્ધિવિનાયકષોડશોપચારપૂજાસ્તુતિઃ (૧) સમ્પૂર્ણા ।

Proofread by Narendran Madathil

---

*Siddhivinayaka Shodashopachara Pujastutih 1*

pdf was typeset on October 10, 2026

Please send corrections to *sanskrit@cheerful.com*